मतस्यां ग्रहणानुवृत्तेरिति भावः सिकताइति लुपि युक्तवद्भावः हयवरट्सूत्रे एकारिकतेति भाष्यादेकवचनांतोप्ययं दंतुरइति
निम्नोन्नतेप्रयोगस्तु लक्षणया। उन्नतेति किं दंतवान् ऊयक्षारमतु। मधुमाधुर्यमिति रसवाचिन एवात्र ग्रहणमिति भावः स्पष्टं
चेदं भाष्येनगरमिति चातुरर्थिकरप्रत्ययांतनगरशब्दस्तु देशविशेषनाम। अयंतु जातिवाची अतएव नगरीति जातिलक्षणेः
ङीष्। पुनर्ग्रहणमिति पुनर्ग्रहणस्य घुङ्भ्यां मइत्यस्य नित्यत्वार्थतायां भाष्ये उक्तत्वेन व्याख्यानादेवास्य सर्वविभाषार्थत्व
मितिवक्तुमुचितं मणिवद्गसादि बिंबावं कुरणव मिष्टकावमित्यप्यस्योदाहरणं अस्य षामपीति दीर्घः अणिसोलोपश्चे

तिभाष्ये न दृश्यते केचित्तु शानुबलः पुत्रबल इत्यादौ। आन्तबलेऽणादित्यनुवृत्तेरपि तद्भावः अतइञिति। एकाक्षरात्कृतो जातेः सप्तम्यां
च न तौ स्मृताविति भाष्यं। एवं व्रीह्यो ति व्रीह्यादिगणेऽपि पाठादिहार्थग्रहणं तेन शालिलः शालिक इति सिद्धमिति वृत्तिः एकागो
पूर्वसूत्रे बहुव्रीहिः अधिकारप्राप्तप्रातिपदिकादित्यस्य पदार्थः ऐकशतिक इति। पूर्वकालेकेति समासः तद्धितार्थोत्तरपदे तिस
मासस्य समस्तेर्थेनभिधानेनाप्रवृत्तेः संख्यायाः संवत्सरसंख्योत्तरपदस्येति लुना। तत्र संख्यापदमुच्चार्य विहितस्य तद्धितार्थेतिसमासस्ये
व प्रतिपदोक्ततया ग्रहणान्न। अत्रातइति निवृत्तं अत एव गोशकटिरस्यास्तीति विग्रहेऽपि गोशकटिकाइत्येव न तु गोशाकटिमानि
ति। गोविंशतिरस्यास्तीत्यादौ त्वनभिधानान्नेति स्पष्टं भाष्ये। द्वंद्वोपतापेत्यादौ मंडूकप्लुत्यानद्वसमस्य संबंधः समासांताइति सूत्रस्थभा
ष्यादिसत्वं। निष्कासर्वाविति सूत्रेऽसामर्थ्येपि सौत्रत्वात्समासः अंतग्रहणं शतादिपूर्वोत्तरनिष्कादिनिवृत्त्यर्थं निरासार्थं। मिनजितिपा
ठः हृदयोल्हृदविक इत्यादि अनेनान्यतरस्यांग्रहणेनातद्गुणीसंख्याप्रष्टौ तत्र मतुप्समुच्चयबोधकान्यतरस्यांग्रहणानुवृत्तेः प्रत्यय
त्र पक्षे लभ्यमिति भाव इत्यपि। पिदयमिसंकेनिर्दये महद्विदितो महत्तरेत्येवं महत्तेसाधपित्वात्स्यभाष्ये प्रत्याख्यानात्। तत्र हि स
हृत उपसर्गात् उपसंख्यानेनोपसर्गत्वसामर्थ्यादजंतत्वाभावे प्यच उपसर्गादिति तत्वं तत्र त्वविधावुपसंख्यानेन न सिद्धं प्रथमे 
उपसर्गसर्गसंज्ञायामुपसंख्यानमनेकसंज्ञात्वाभाव्यमिति निपातत्वान्महत आधुराप्तेन तत्तीयाकर्मणीति पूर्वपदप्रकृति

स्वरेण मत्तस्मात्पुरस्तात्। एतावता संज्ञास्तवविषयाः एवेति महद्भिर्दत्तमिति भाष्यप्रयोगो नानुपपन्नः एवं च फललाभे शपनिव
मेवोचितं पि लेतु मध्यादान्तले स्यादित्सपरे। एतद्विषये मतुमत्स्यहृदिश ह्लादावयवार्थाभावेन तद्ग्राम्भरिस्यमन्त्रविस्तरः
पदलमिति तेन नयस्येति लोपो न अनुवर्त्तयंतीति बहुलं छंदसो ऽस्यतः वाचो ग्मिनि गकारोच्चारणं प्रत्यये माषायामिसनुनासिका
भावाय। तुत्तरसूत्रस्य बहुभाषिणी त्सस्यापि संबंधात्सम्यक् बहुभाषिणि वाग्मीति बोध्यं। ए...येति। तेन धनवानि त्यर्थे स्वामी
ति न। कटकवलयिनीति कटकवलययोः कंचिच्छिद्रं परिकल्प्य हंदुहदुपपाद्यः अत इनि ठनाविति। समासांता इति सूत्रस्य भाष्या
न्मंडूकप्लुत्यात दनुवर्त्तत इति भावः ठनादीति। आदिना घञ्मोमेनुवितपो ग्रहणं मतुप्समुच्चयार्थ्या न्वरस्यांग्रहणं सिकगो
इति सूत्रे निसग्रहणात् बलादिभ्यो मतुब्विति सूत्रे न्वरस्यांग्रहणाच्चासंबंध इति भावः अस्मायेस्र त्रनुसंबंध्यत एव तस्मा विति
सूत्रे पशस्वानिति भाष्ये उदाहरणात् अक्ततेकाजिति सूत्रे स्रग्वत्तर इति भाष्ये उदाहरणाच्चेति बोध्यं। वातातीत्। कुणपेभेवद
अदंतलादेर्वेनेः सिद्धत्वादिति वृत्तिः ठलाधनार्थमिति सामान्यसूत्रेणासिद्धेः सूत्रस्य फलांतराभावाच्चवर्णाद्व। वर्णेत्रेव
दाध्ययनार्थं ब्रह्मचर्यं। अर्थाच्चेति। अर्थशद्वोत्रधनवाची। कालतोत्रासंनिधिर्नदेशतः तत्रविरोधादस्तीसस्यासंबंध इत्यप्रा
प्त एवेनि विधीयते सन्नो याधिकादिनिठमोरभावो नभिधानात्। अत एवासंनिहित इति किमर्थमर्थवानिति भाष्ये उक्तं अर्थोम

मर्थो विद्यामः श्रुत्वानुपहतश्चय इति वाच्यो ऽन्यथेन मर्थे इति क्रियाशब्दात्स्वार्थे या पाधिकादिनिठनो भवतु तएव मतुप्सुनानमिधा
नात्तेते नार्थिक प्रत्यर्थिको धामार्थी त्यादि चमिद्धं । धान्यकरणकप्रार्थनावानित्यर्थः बलादिभ्यो ऽन्यतरस्यामिति ग्रहणं हृद्वोपता
पतिप्रकृतस्येतः समुच्चयार्थः । तेनेतस्माट्ठन्नप्रथिमिनोतिङ्मनिजंता प्रकृतिः अनिन्मानित्यनर्थकेनापितदंतविधिः मेतिमा
तस्योदाहरणमित्यर्थः वकारयकारपरस्येतिबहुव्रीहिरनुस्वारोन्यपदार्थः इतिमत्वर्थीयाः । प्राग्दिशो वा एवानादिदं संज्ञा
स्त्रैतदाह विभक्तिसंज्ञा इति । स्वार्थिका इति प्रायेणेति शेषः स्वीयप्रकृतेरर्थे भवा इत्यर्थः तसिलादावर्थनिर्देशाभावा इति श
पनेइत्यादेर्नाप्रकृत्यर्थविशेषणत्वादिति भावः ज्ञापितं तात्पर्यं वधुनिप्रकारवचने इत्यादिविहितस्य तु वाचकत्वमेवात एव तदर्थे स्यावि
शेष्यतयाभानमतः प्रायेणेति पूरितं किं सर्वनाम । प्राग्दिश इत्येवा द्व्यादिपर्युदासात्किमः पृथग्ग्रहणं द्व्यादिभ्यः प्रागेव किमत्र
बहुलं न पठितः कश्चाभवांशाश्वकादि सत्यभवतः शेषापत्तेः त्यदादीनां यत्सर्वनाम्नि दृष्टं विश्वतइत्युक्तेः विधेयो निर्देशादाहाधिक्रियत इति ।
बहुशब्दश्चात्रसंख्यावाची एव व्याख्यानात् । प्रकरणलभ्यमाह प्राग्दिशीयपरे इति दिशः प्राग्दिशं तत्र भवे इत्यर्थः एते तो हितीयो व
ज्ञेनातः यथासंख्यं कार्यनिमित्तयोः नलोप इति सर्वादेशत्वं तानुपूर्व्या सिद्धं । इत्यं तातु न फलाभावात् । परत्वादत्रः पूर्वमेव स एम०
दायत्वे निकृते लक्ष्ये लक्षणस्येति न्यायेन पुनरत्वाप्रवृत्तिरिति भावः कुतिहोः अश्वन आ इत्यतो विभक्ताविव्यनुवर्त्तते । तौ सत्रे

कार उच्चारणार्थः । तिहोरिखस्य स्यफलमाह कस्मादिति । यतइति तमिलादीनां विभक्तित्वात्सदा घञं । परस्य तसेरिति प्रति
योगे पंचम्यास्तसिरणाद्ने चाहो यह होशिति वक्ष्यमाणास्यस्यर्थः प्रत्ययग्रहणपरिभाषया नमस्धातोर्ने ग्रहणं स्यात्स्याना च्च ।
स्वरार्थे विभक्त्यर्थे विभक्तिनिमित्तालायर्थे । स्वरार्थमिति भाष्यं तत्पलस्वरांपूर्वोक्त विभक्तिकार्यस्यापीति बोध्यं । सर्वाभ
यति । अभिधानमूलमेतत्भाष्ये उक्तं आदर्ने परि षिंचती स्यादौ सर्वार्थे लेपि वाग्रहणानुवृत्ते नैतमिलवाग्रहणमिति । साह
चर्यौ च्च कुत्रचित् नान्यत्र कुत्रापि च सा भिलाषमितिषङ्कुतर प्रयोगदर्शनादि दमुक्तं भागवृत्तिकृताः । हदयस्तु किमो भाषायां
त्रलं नेच्छंति भाष्य स्वरसो प्येवमेव । एतदस्त्रता इ द मोन्बादेशाद् सतोऽशनुवर्त्तते । एतदोनिसेव मिद्वनुदात्तार्थं वचनं ननुलि
त्स्वरे शेष निघाते नैवतत्रत सोऽनुदात्तत्व सिद्धे तयोस्तद्विधानं व्यर्थमिति चेन्न्या लित्स्वरापवादेशोऽनुदात्तत्वे कृते लित्स्वरप्रा
प्त्याप्रसत्ययस्वरेणात्रत सोऽनुदात्तत्वेप्राप्ते न त्वा र्थक्यात् । अतो नेति । अत एतस्मा ज्ज्ञा मादि त्यर्थः । सप्तम्यंते भ्य इति सप्तम्या इत्
वानुवर्त्ततेक्त सत्त्वरितत्वात् ततरा भ्य इति । तिभावः सर्वत्र देशइति । सर्वत्र काल इत्यपि बोध्यं । कालइत्युपादानेन सर्वश
ब्दस्य तत्र कालार्थकत्वाभावात् अत एव वर्त्तमाने लडिति सूत्रे भाष्ये स्य अनागतमतिक्रांतं वर्त्तमानमिति त्रयं सर्वत्र
च गति नीस्तीति प्रयोगे कालवृत्तिसा विवक्षायां दानकृत इति केपटः । विहितत्वादिति । सर्वैकान्येसेनेन । एतद्भाष्यस्यर्थं ।

दहीति एतत्प्रतिंहंहिभंतं यदीत्येतदखंडमव्ययं। एतर्हीति एतद इतियोगविभागेन एतारेशः अस्मिन हनातिपुष्येणायुक्तः
कालोपमिसर्थके अथ पुष्यइत्यादौ शक्तिमत्प्रधानता। इदमहइ सर्थेप्यधेसंभेत्र्यपदेशिवद्भावेनसप्रयोगइसपरेएघुमि
तिनिपातनादेतोर्यं। भाष्यितु चित्यमेत। प्रकारवचने। पंचम्यर्थे सप्तमी त्याह प्रकारवृत्तिभ्य इतिवचनग्रहणात्प्रकारवद्ध
त्तिभ्य इत्यर्थः तेन प्रकारेणात्मस्यविशिष्टइतिशेषः सामान्यस्य भेदको विशेषोत्र प्रकारः बहुभिः प्रकारैर्भुंक्ते इत्यतोबहुभि
र्विशेषैरित्यवगमात् स्यादप्ययंतु न गदृयतेन्यथा सर्वथेत्यादौ तदप्रतीत्या न भिधानात्। यथा हरिस्तथा हर इत्यादौ यत्प्रका
रवान् हरिस्तत्प्रकारवान् हर इतिबोधे हरिसदृशो हर इति फलतीति बोध्यं। अस्यंतस्यार्थिकोयंप्रत्ययं विनापि पश्चेत्रः सैभत्र
इत्यादौ प्रकारवचनत्वदर्शनात् द्योतकत्वे तेदर्थस्य विशेषणतापत्तिभ्य एवं जातीयर्वथावपिबोध्यं। स्थूलादिभ्यः कन्विधौ चे
वमेव स्थूलादीनामपि गोर्वाहीक इत्यादौ गवादिपदानामिवास्येव भत्ययं विना पि प्रकार इवाचि त्वमत एवेष्वानिसवंनोक्तं।
दिक् शब्देभ्यः नेह यथास्थ्यमस्थिरत्वात्। शब्दग्रहणात्तं भ्यमर्थमात्ह दिशि दृष्टेभ्य इति। संख्यायाइत्यतस्यर्थे तमस्तातिप
दरहितमिदं सूत्रमनुवर्त्तते अस्तातो पुरस्तादेशविधानार्थमस्तीमिंचैती दृत्ते स्पष्टं तत्रानुवृत्तिप्रदर्शनाय पूर्वे सादिसूत्रमपी
हयाच्येष्टबोध्य। असोसविभक्तिकंसंयोगमिष्टलापचकारः अवरस्यामित्यनंतरयोगेषष्ठी। अस्तातिच। लुप्तसप्तम्यंन

रम०

मिदंतदाहास्तानाविति शङ्के भेदादर्थभेदेपिसमानानुपूर्वीकत्वादिकृशब्दे दृश्यादिवृत्तिरितिव्यवहारोबोध्यः पूर्वादयस्तस
दिक्छ्यत्वंप्रवृत्तिनिमित्तीकृत्यसकृच्चित्। वक्तृसंमुखदेशत्वंतथाकृत्वाक्वचिद्देशेप्रवर्त्तन्तेअतएवपुरइत्यस्याग्नेरसर्पकत्वं
विश्वकोशादावुक्तं। क्वचित्त्वसंयुक्तसंयोगित्वंयथापरादिशब्दे। प्रकृतसूत्रेचसर्वेषांग्रहणंविनिगमनाविरहात्पूर्वस्मिन्गु
रावितिपूर्वकालाध्यायतकृत्तैरीत्यर्थः दक्षिणोत्तरा। ननुतत्पुरुषसमासेपास्तुदक्षिणस्यांदिशिदक्षिणतइतितुसर्वनाम्नोवृत्ति
मात्रइतिपुंवत्वेनसिद्धं। षष्ठ्यतसमर्थेतिसूत्रेषष्ठीतस्यैथेतिपाठ्यंतेनेतनतीग्रामादस्यइत्यादौपंचमीबाधिकापरत्वात्षष्ठी
नेतिचेन्नस्यस्थार्थत्वात्प्राच्यामितिलिंगविशिष्टपरिभाषयास्त्रीत्वेलुकविभक्तित्रयार्थप्रकटंपितुमाहृत्समसागइतसादि।
एनवन्यतः अपंचम्याइतिप्रागेमेरनुवर्त्तते। आहृेइति अवधिमानवधेश्चदूरेसर्थः केचिदिति। अवसंत्वानुनेमवष्णि
तविभाषाविज्ञानादितितदाशयः इयमेवात्रारुचिः दक्षिणादाच्कार्करआजाहीन्सत्रविशेषणार्थः तनवाक्यसमरणपोरड
हाकारस्याहृत्तिरितिमाध्यउत्तराच्चेवेनमवहितआजपिसमुच्चायतेव्याख्यानात्तदाहोत्तरेति सिख्यायाविविधस्यार्थइ
त्यर्थः विधानंविधइतिघञर्थेकः विधशब्दस्यार्थअस्मामासस्यभेदकविशेषरूपः प्रकारः मत्वाभिधानस्यामाख्यात्वानात
तदाहोत्तरेति। संख्यायाविधि। विधस्यार्थइत्यर्थः विधानंविधइतिघञर्थेकः विधशब्दस्यार्थअसामामासभेदकविशेषरूपः प्र

ल० श० शे०

कारः सचाभिधानस्वाभाव्यात्क्रियाविषयक एव गृह्यते तदाह क्रियाप्रकार इति तदुक्तं भाष्ये विधयुक्तगताश्च प्रकारे भवंती
ति त्रेधा गुणेन नवधा ऽध्यमित्यादावप्युपदिश्यते भवतीति क्रियाकेध्या चतुर्वेति चतुर्भिः प्रकारैरित्यर्थः अधिकरणस्य द्रव्य
स्य विचलनमन्यथाकरणं तच्च हस्ते ख्यासंनिधानात्तद्विषयमेवेत्याह द्रव्यस्य संख्यान्तरेति तदवगमश्च पदान्तरसमभिव्याहारा
दिति बोध्यं। एकं राशिं पंचधेति पंचत्वसंख्याविशिष्टमित्यर्थः एकाद्ध्या धाग्रहणं धामात्रस्य यथास्यात् अन्यथानन्तरत्वादधिक
रणविचाले विहितस्यैव स्यात् अत एव प्रत्ययो नाकारेण विचाले एव संनिहितत्वाद्रापत्तेः परस्मिन्नेकमकं क्रियते सोपाधिक
रणविचाले विहितस्यैव स्यात् अत एव प्रत्ययो नाकारि[illegible]ल इति बोध्यं ऐकध्यमिति। भुंक्ते इति राशिं कुर्वन्तीति वा शेषः द्वैधानीति
स्वभावात्स्त्रत्ववाचित्वं। एषा च द्विर्मेधोऽस्मिन्धाजिसर्थः पाप्यया। याप्यमत्र कुत्सितं कुत्साविशिष्टेर्थे वर्त्तमानात्साशवित्यर्थः अ
र्थे प्रवृत्तिनिमित्तकुत्सायामेव। कुत्सित इत्यस्य प्रवृत्तिनिमित्तकुत्सायामपि प्रवृत्तिरिति बोध्यं। पूरणाद्भागे। पूरणार्थकतीयप्रस
यान्ताद्भागे वर्त्तमानादित्यर्थः तीयादीकक् इति वचनद्वयं दृष्टं सामेस्तत्र भाष्ये स्पष्टं पूर्वेत्रज्ञानोनित्सावितिः। तत्र षष्ठाष्टमाभ्यां भागा
र्थे प्रतिपादनार्थं लुग्विधानं प्रत्ययान्तस्यार्थकत्वेन प्रकृतेस्तदर्थत्वलाभात्। मकरणादिकं तु तत्वाप्यावश्यकं। स्वरस्तु लुकि नास्ये एम०
वेति तल्लुमते सत्र भाष्ये स्पष्टं। एकाद्। असहायपर्यायवाचकादेकशब्दादित्यर्थः असहायेति किं प्रसिद्धतरसंख्यावाचकस्यैवाग्रेत्र

वात्रापि विग्रहरणापत्तौ द्विवचनाद्यसिद्धिः स्यात्वाक्यभेदे मकनाकि निचोरेव लुक् विधानसामर्थ्यात् संक्षेश्रवणमपि भूतपूर्वान्तत्रा
र्थेवर्त्तमानात्प्रातिपदिकादि सर्थः षष्ठ्याह। अत्र भूतपूर्वे इ सनुवृत्तेश्रुतत्वात् षष्ठ्या विशेषणांभूतपूर्वे संबंधे याषष्ठी तदंताल्स्वा
र्थे प्रत्ययो तएव स्वार्थिक प्रकरणादि रोधान अनिष्टापनेनाऽतिशेते: प्रकर्षापरपर्यायपइतरस्मन् नीकरणाह पोभिभवोर्थः एवं
च सक मेकाद्दस्माद्द्धाकुलकाल्क चोरिस्सुदू इत एवनिपातनात्दीर्घः तत्र वर्त्तमानात्प्रातिपदिकात्स्वार्थे प्रत्ययइत्यर्थः यत्तु या
व द्भ्यात प्रकर्षे तिशये इति लावद् तिशायन इ सुक्तमुपक्रमे भाष्यतत्र भावार्थकस्य कर्तृपचाद्यजंतस्य च तत्रैणोच्चारणंबोध्यं
अग्नेगुरणोभिधीयत इसुक्त्वाकालोतिपात इति विग्रहप्रदर्शनेन वाकुलकातह्स्मुडिस्सुक्त्वाचतयाभाव्यार्थलाभः तदाहाति
शयविशिष्टेर्थ इति अतिशयकर्तृरूपेर्थ इत्यर्थः भावेत्सुडिति तु न युक्तं तत्रार्थे प्रत्ययइत्यर्थतस्य प्राधान्यापत्तेः अत एवभावल्यु
ट्पक्षे लिंगवचनासिद्धिर्भाष्ये शंकिता अतिशयवर्त्तनइति व्यवहारः संचेतसां न चातिशयशद्धस्यतद्विशिष्टेलक्षणा। अभिभ
यमानादेव प्रत्ययापत्तेः तलक्तेति लक्षणापोतुभाष्योक्तमेवसाधु। अत एवैतेषांसमानाधिकरणवृत्तितद्धितत्वेन व्यवहारो
युष्मघुपपदेलटः शतृशानचाविसादेशोभाष्ये। प्रातिपदिकार्थे तद्धितघोसार्थस्य सामानाधिकरण्यमिति तदर्थः तत्र प्रकृत्य
र्थद्रव्यस्यस्वरूपतइ तराभिभवकर्त्तृत्वविशिष्ट आढयोर्थः प्रत्ययस्तु घोतकः कुमारितरे स्यादेतड़ी प्रुनतरप्रकृतिस्तेनतदंतप

टकेन कुमारीशब्दादिना वयोविशिष्टार्थगतस्त्रीत्वस्योक्तत्वात्तत्संबन्धस्य तु प्रकर्षः प्रवृत्तिनिमित्तमतस्तद्धि शिष्टार्थगते स्त्रीत्वे
टाबेव न वयसीति ङीप् वयोमात्रविशिष्टार्थगतस्त्रीत्वे टाबेव न वयसीति ङीप् वयोमात्रविशिष्टार्थगते स्त्रीत्वे हि तत्प्रवृत्तिः। अत एव
वर्गोते रसादौ न ङीष्। जातिप्रवृत्तिनिमित्तकत्वाभावात्। उक्तं भाष्ये मद्रिप्रथमं नात्स्वार्थिकः कुमारितरे इत्यादौ केवलवयसः प्रकृ-
ष्टं वयो नातिरिक्तमिति ङीप् प्राप्नोति तरपोक्तत्वात्स्त्रीत्वस्य प्रत्ययेन भविष्यतीति तत्र यातत्स्वप्रकृतिभूतेन वयोविशिष्टार्थगतस्त्रीत्व-
स्योक्तत्वादिसर्थः एतदुत्तरं टाबपि न प्राप्नोतीत्यादि भाष्यमेकदेशितो हृक्तिरिति बोध्यं अतिशायनिकप्रत्ययान्तादातिशाय-
निकान्तानभिधानात् श्रेष्ठतमाय कर्मणे इत्यादिकं तु छांदसत्वात् स्वार्थे साध्विति सर्वं भाष्ये स्पष्टं अतिशायने तिप्रकृत्यादित्वात्तीपा-
तिङः स्वार्थे आप्रातिपदिकत्वात्प्राप्तिवचनं। किमेत्तिङ् किमादिप्रकृतिकघादि सर्थस्तत्फलितमाह आमयाच्च पोप इति। किंतमामि-
ति। आमन्तस्याव्ययत्वात्तमतः परस्य सोर्लुक्। पूर्वाराह्णेतरामित्यादौ तत्र तत्क्रियाविशिष्टस्यैव तत्तत्कालव्यवहारनियामकत्वान्न
शुद्धद्रव्यप्रकर्षः उच्चैस्तमामिति उच्चैःशब्दोत्रोच्चत्वगुणवत्परः द्रव्यस्य स्वतः प्रकर्षाभावेपि द्रव्यनिष्ठगुणादिप्रकर्षेण द्रव्यप्र-
कर्ष इति बोध्यं तदुक्तं तमप्सूत्रे कैयटेन अद्रव्यप्रधान उच्चैःशब्दस्तत्रोच्चत्वप्रकर्षे गाततदाश्रयस्य प्रकर्षेपि तत्स्य न द्रव्यत्वं क्रिया- राम॰
कारकभावरूपसंबंधविशेषणे नैव तत्स्वभावेन नाप्रधानतया सर्वनामपरामर्शयोग्यत्वात् शक्त्याविष्टस्य सत्त्वेनाम्नायपराम

शोभावाद्योतस्यैवतदादिशब्देभ्यस्तत्रद्विभक्तयः यत्किंचिदिदंतदितिसर्वनामभ्यः सामान्ययोगंपवस्तुतत्त्वं इत्यत्र विवक्षितमितितम
श्चन्द्रे के पठितः इदं पूर्वीरोहतमाभिस्तत्रापि वाच्यं द्विवचनविभज्योपपदे प्रतिपादके विभजनीये चोपपदे इतोमध्ये मतरापेक्षा
तिशयविशिष्टस्वार्थवृत्तेर्विभागप्रयोजकीभूतधर्मवाचकात्स्वार्थे प्रत्ययः विभज्यशोटपपदश्रुत्या बोधितमुपं तत्र प्रतिप
दोक्तत्वात्पंचमीविभक्ते इतिविहितपंचम्येवेतिबोध्यं तेन सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका आढ्यतमा इत्यत्र
नतरकादितितस्मिन्नितिसूत्रभाष्यप्रयोगाद्दूष्टपुत्रेधेतदुपपन्नंभवति अयं मे ज्येष्ठोयं मध्यमोयं कनीयानित्याघं तत्र सूत्रस्थभा
ष्यप्रयोगाद्दूष्टपुत्रेघेतदुपपन्नंभवति अयं मे ज्येष्ठोयं मध्यमोयं कनीयानित्याघं तत्र सूत्रस्थभाष्यप्रयोगाच्छात्रेर्थोपपदेपी
मोसाधु। सूत्रे द्विवचनेतितदाहरणमात्रमितिकेचित्परेतु नैर्देशिकानां मध्ये न्यूय्यः शोद्धः इत्यस्य व्याप्तस्य विभज्योपपदे तरप्
आभ्यामिसध्यातस्यांसर्वेयसुनतएवनखल्वपि बहूनां प्रकर्षे तरपाभवितव्यं के न तर्हि तमप् इति तमसूत्रे भाष्ये उक्तमिसा
ध्वः नतरामित्यादौ प्रतियोग्यसमानाधिकरणलहपासंतिकलेशभावात् । प्रकर्षेतरप् प्रवृत्तिनिमित्तगतेप्रकर्षेतस्वादिरि
तितुप्रकृत्यर्थप्रकर्षासंभवविषयं एवं द्योत्यार्थे प्रकर्षेपिद्योतकान्तरप्राप्यानितरांगच्छतो सौरेतुश्छंदसिपूर्वे नियमव्याव
र्तितप्रतिप्रसवलंस्फुटंबोधयितुं छांदसमप्यत्रोपन्यस्तं तु दिष्टे । इम निच ग्रहणं मुख्यार्थेन चेन एवं तापकादिष्टनीयसुनोः

सिद्धो तु शब्दं दर्शीति व्यर्थमिति वाच्यं इमति चापि कस्य नायं तः लोके पीष्ठ नादेरायन्ते अपघपि निमित्तस्य छांदसत्वादिदं छांद
सं तथापि तस्यैवेट्टो पन्यासादिदमप्यत्रोक्तं लोप इति सवनसामर्थ्यात्सर्वादेशः अस्य स्पटोरस्येनेन सिद्धः प्रशस्य। अजादी इ
सत्वु इत्तं सन्नस्यावि परिणामप तद्साद्दाजाधोरिति प्रशस्य त्वेगुणइत्यजादी। तस्य क्रिपात्वेपि अतएव ज्ञापकात्तो। अक्ते से
कात्। इष्टादिष्विति तेनसो देवतास्य ञः स्यालोपाकइत्यत्रेनेदं। अयं च प्रकृतिभावो ह्लोपिनो नस्त द्धिते यस्येति चेटीत्यादेरत
त्त्वकं सेकाजिति सूत्रस्य भाष्याक्तेः। साभ्रेष्ठ इत्यादावुच्चारणसामर्थ्यादिकारस्य लोपाभाववदत्रापि तदभावापत्तेऽनेनदिष्टइ
त्यावसिद्धः उत्तरसूत्रस्य कन्याहृच पाञ्चकनिष्ट इत्यादौ टेरितिलोपस्तु न प्रकृतिभावात्तक नस्तादपवादत्वाच्च नस्तद्धित
इत्यपि न। अन उच्चारणसामर्थ्यात्सर्वादेशस्तु केत्यादेशेनापि सिद्ध इति बोध्यं स्थूलदूर। यणादीति लुप्तषष्ठीकं। परमिति
षष्ठ्यर्थे प्रथमा। पूर्वेष्ववधिस्तु यणादिरेव। यणादीति बहुव्रीहिः इकोरिमाषयाक्षिप्रक्षुद्रयोः यकाररेफारयोर्न गुणः पु
व शब्दस्य गुणवचनत्वादत एव ज्ञापकादजादी अन्ये तु गुणवचनात्स्वात्मवक्षिप्रक्षुद्रा वगुणवचनो। इमनिचितद्धि हृष्णस
चारितार्थ्यात्तयोरिष्ठनावनापत्तो क्षेपिष्ठ इत्याद्यसिद्धः वस्तुतो पुवशब्दो गुणवचनापीत्याकडारसूत्रजातेरस्त्रीतिसूत्रभा राम॰
ष्याभ्यां लभ्यते प्रियस्थिरवेद्दादाविकार उच्चारणार्थः अन्यथा भीयात्सिद्धत्वादिकारोच्चारणसामर्थ्याद्धाप्रादादिवद्विलोपा

नापत्यावंवहिष्ठ इत्यादिषु सिद्धं वर्णादिमाहच्चयोर्द्वन्द्वोऽहृ लंतां तेन वृंहदिष्ठ इति। प्रस्थस्फास्तु प्रेष्ठ इत्यादेर्माष्येऽडस्वान्तत्वेनादेत।
एव। प्रेष्ठ इत्यादावादेशस्यासिद्धत्वात्प्रकृतिभावाच्च तन्निमित्तकटिलोपो न। स्थानिनिमित्तकोऽपि न यणादेशानन्दिलो
पाष्वादत्वात्। बहोर्लोपो। इष्ठन उत्तरसूत्रेण। कार्यान्तरस्य विधानात्तस्येह न ग्रहणमित्याशयेनाह मेयसोरिति। लोपश्चा
देः परस्य स्यादेः भूभावस्यासिद्धत्वाद्यानित्यं त्वेनोर्गुणो नादौ घोच्चारणं तु भूमेत्यादौ सावकाशं विन्मतोर्लुक्। स्रजादी
इत्यत्र तु हन्तेराहेष्ठे यसोरिति स्रतत एव ज्ञापकाद्भाम्या मजादी। न च विलिषयेमतुपः मतेन तल्लुके वसिद्धो विन्ग्रहणं व
यमितिवाच्यं। नेकारोतीत्यादिना णिचीष्ठवद्भावेन विनीलुगर्थं तत्सत्वात् विल्वकादिभ्यश्छस्येत्युत्तरमेव विन्मतोरिष्ठे
मयः सुतुरितिनोक्तं तत्रत्सलुक्परस्यास्वरितत्वादतएव तु रिसत्रलोपइ सेवस्यात्वात। प्रशस्यस्य श्रः। प्रशंसा विशिष्टेऽर्थे
वर्त्तमानात्स्वार्थे रूपविल्सर्थः। प्रशंसा चात्र परिपूर्णत्वं रूपवैस्यस्य यथारूपाप्रकर्षस्यर्थे तावच्छेदकधर्मनिष्ठा वा प्रकृत्यर्थे आ
रोप्यतेऽत न चोर रूपो यंय वृक्षेणा इंजनं हरेरितिसिद्धं प्रत्ययान्तस्य प्रतियोगिनिरपेक्षमतिशायनं तु तत्सापेक्षमिति न त
दनुवृत्त्यासिद्धेः। ईषदसमाप्तौ। ईषदसमाप्तिविशिष्टेऽर्थे वर्त्तमानात्प्रातिपदिकादित्यर्थः स्वार्थिकानां प्रकृतितो लिंग
वचनातिक्रमात्सिद्धं ग्रहणं च। स्त्रियामिति सूत्रे स्त्रीग्रहणं तदतिक्रमः अस्याण नः स्त्रियां विधानादत एव स्वार्थिकत्वा

त्तिद्धो किं तेन । गुड शब्दस्य तादृश्याद्वा शापांहृति स्तत्र तादर्थ्य प्रयोजक धर्मस्य माधुर्यादे रीषदसमाप्तिः पत्निहृपित तादर्थ्य प्रयो
जक धर्मस्येषदसमाप्तिः पत्निरूपित तादर्थ्य प्रयोजक धर्मस्येषदसमाप्तिस्तद्वा चकाच्च कल्पादयः स्वभावात् । एवं च पूर्णोप
टुः कश्चित्तत्तादर्थ्यादत्मः पटुकल्पः प्रचुरतादृश्यैश्यैच पटुकल्प शब्द गम्यमिति सर्वत्रोपमागम्या दृष्टव्या विभाषासु । वि
भाषा ग्रहणं कल्पवादि समासे शार्थ केल्पादय स्तिडंतेषु सावकाशाः वाक्यार्थे तु मनतत्तेस्यर्थे लम हानि भाषयेयवसिद्धेः
अनिष्टं लेतु न तदर्थ तातस्येतिबोध्यं । सुप्यग्रहणं तिडश्चि सस्यात्रास्संबंधाय उत्तरत्र सनुवर्त्तेत एव । पुरस्तादिति प्रत्ययपरत्व
निवृत्तये पः तु ग्रहणं पुरस्तादित्यस्याहत्यापुरस्ताघाद्द्यो लिंगवचनेनादशे एवेसर्थबोधन द्वारा स्वार्थिकानां प्रकृतितोलिं
गाद्यतिक्रमसत्तापकं । तृतीया गेवेसेव कारस्तुमर्वेवा कोसावधारमिति न्याय सिद्ध इति सर्वे भाष्ये स्पष्टं । प्रकारव । अत्र प्रकारो
भेद एवेति जयादित्यः सादृश्यं भेदश्चेत्युभयमपीति प्रकारे गुणवचनस्येत्यत्र वामनः पालप्रकारमात्र इति । तत्रापि प्रका
रवचनेन हृस्व वोक्तो सोपि प्रकारवति मा प्यदाति चित्सं किंचन यामतितथेलादेः सप्रकार इत्यादिरर्थः स्यात्तनु च पालाजातीय
रो वा धापत्तो जज्जातीयइत्याघ सिद्धिरिति वाच्यं । जातं तच्छब्दं बुनीय नेनेष्टापत्तेः वामनोक्तरीत्या हि देनेव थालापि वा रामः
धनेष्यत इति वक्तुं शक्यत्वाच्च अत एव यथा जातीयक इत्यादि भाष्य प्रयोगाः संगच्छते अयमत्रायमप्यधिकारः अज्ञाते

इत्यादेरनुवाक्यभेदेनाकच्चोपि विधानं बाधकस्याप्यमिति अज्ञातत्वाभिनयो यं अज्ञातो श्व इत्यपि विग्रहो बोध्यः अमयेति स
त्रे प्रातिपदिकादिति सुप्तिङ्ति च संबध्यते तेन कश्चित्सुवंतावयव प्रातिपदिकेऽग्रहणं कश्चित्सुवंतावयवं तदग्रहणं त
न्नयवस्थामाह ओकारेति। इदं वाक्यं पुष्मदस्मच्छब्दमात्रविषयं। भाष्ये तयोर्वोदाहरणात् अमेषां तु सर्वनाम्नां प्रातिपदिक
देरेव प्रागकच्च् अत एव कादेशः साकच्कार्थः कं कोके इत्येवमर्थमिति भाष्ये संगच्छते तलपके तिपत्वादिषु कृते ष कव।प
चतकीति अकचो द्वितीयो कारश्चारणार्थ इति भावः। कुत्सिते गतकुत्सापां कुत्सितेव स्तुतस्तद्धर्मयुक्तार्थाभिधायिनः
प्रत्ययः अश्वक इत्यादौ धावनादेः सम्यगननुष्ठाना कुत्सेति बोध्यं। कुत्सिते पन धर्मेण कुत्सितेव स्तु तस्तद्धर्मयुक्तार्था
भिधायिनः प्रत्ययः अश्वक इत्यादौ धावनादेः सम्यगननुष्ठाना कुत्सेति बोध्यं। कुत्सितगतकुत्सापां कुत्सितक इत्याद्यपि
प्रसक्तमत इति वत्। संज्ञायां कन् कुत्सादिहेतुक संज्ञाविषये कन्निसर्थः रघुकादिष्यप्यविवरणमनुकंपायुक्तादिति धान
का इति धानाशष्कुलिकेण इति हूस्वेकांतात्वापि अभाषितपुंस्काच्चेति विकल्पसंक्षेप इत्याभावः पूर्वोक्तेति अनुकंपापास्तदि
षयत्वादिति भावः परपरासंबद्धपीति। आरंभसामर्थ्यादिति भावः अनुकंप्यमानो रानेनाराधयतीति धानादेरनुकं
प्यमानसंबंधादनुकंपायुक्तत्वमिति बोध्यं ठज्वेति पक्षे कः पूर्वसूत्रद्वयेति अनुकंपायां नीतौ चेत्येतत्व्याख्यानादिति भावः

घनिता पूर्वस्मन्नेरेणेव टक्कपो सिद्धो योगविभागाद्युक्तविषयातिरिक्तेप्येतो तन्नकटचमिथ्यर्थे चकारइत्सेके। ठजादेरमित्तिमि
नितिबुद्धिस्थं नि धानादित्तिभावः ननु ठग्रहणं व्यर्थमिकादेशेजादि स्थानिमिद्दृष्टत आह ठग्रहणमिति तस्मिन्निति वायुदन्तशब्दात
ठनित्यत्वाद्बहुवस्थायां लोपकादेशवायुकमिद्धिः अन्यथामाथितिकवत्सं निपातन परिभाषयाकादेशाभावे नसिध्यादिभावः
नच घच स्त्रिलेन ज्ञापकेनेकादेः सर्वतः पूर्वप्रवृत्तिरिति वाच्यं ज्ञापकसिद्धस्यासार्वत्रिकत्वात्तट्ग्रहणसामर्थ्याच्चतस्या
न्नाप्रवृत्तेः अत्राजिनांतस्येसन्नसोत्तरपदे तिपृथक्पदं लुप्तमक्तिकेतेन लोपपदमेवानुवर्ततेतत एवषषष्ठाजादिवचनात्सिद्ध
मितिसंगच्छते अतिप्रसंगस्त्वनभिधानाद्वारेणापः तेनमवित्रिपदस्यत्रठाज्जादावितिलोपोनउपेन्द्रदत्तेचतुर्थीदच्च इतिलो
पो ना। विनापिप्रसा। यमितिसमुदायशक्तिग्रहकालेवयवानामपिशक्तिग्रहादवयवतोपितद्बोधः एवंमेवग्रविशपिंडी। मि
मादेवाकौकदेशद्वाकार्थबोधः अस्येषानुवादकमिदं। वर्णमात्रप्रयोगस्तुनेततोऽबोधात्। उवर्णोल्वतइतिलोयस्यपू
र्वाचार्यसंज्ञाउवर्णास्वरस्येलप्रत्ययस्यलोपः स्थचादेः परेस्या। चनद्वितीयादऊर्ध्वलोपः सत्रसिद्धएवान्यघेता। ऋवर्णाद
पीतिभाष्येनदर्षं। पूज्ञार्थमितिठज्वेत्पत्तौवेत्यनुवृत्तेस्थेवमिद्धिरितिभावः उपडइतिनेन्द्रस्येतिज्ञापकेनपूर्वोत्तरपदनिमित्तका
र्यापेक्षयांतरंगत्वाप्येकादेशस्यपूर्वमप्रवृत्तेरितिभावः द्वितीयेस्थध्यक्षरंचेदितिएकपदेपादं। सेध्यक्षरस्येचाः एकाक्षरे

एम॰

तिअत्र स्वहितव्यंजनमसरं एकाच्पूर्वपदानामिति सर्थः द्वितीयादचऊर्ध्वमित्यनेन द्वितीयाज्विशिष्टस्य लोपः प्राप्नोति इदं वागाशी
र्दत्त इति वा व्याशीर्यस्य तेन दत्तो वाक्करणाकस्तुभाशंसेनेन दत्त इति वार्थः अत्रैकादेशपर्यंतबत्तस्य पाद्यस्य स्याधायीत्याक्रा
यप्रवृत्तिपोन्यतया नपूर्वकुलादि प्रवृत्तिः यद्यपि द्वितीयादचऊर्ध्वस्य शीर्दत्तशब्दस्य लोपप्रसक्तिलोपे चांतइकनिमित्तभसं
ज्ञामत्वात्कुलाघप्रवृत्ताविदं सिध्यति तथापि भले आलोपस्य स्थानिवत्त्वादाकारांतनिष्ठभसेन चांतनिष्ठपदत्वाभावात्ताल्व
जश्लघोर्वागिक इति स्यादिति भावः नचमाक्षासरं परयाधायरांतविध्यादिज्ञापकस्य प्रतिबंधकस्य वा स्थानिवत्त्वस्य निषेधइ
ति सिद्धांतात्कृतेपि स्थानिवत्त्वनिषेध इति वाच्यं षडिकेपिदोषापत्तेः यदि तत्र द्वितीयादचऊर्ध्वस्य लोपविधायकवचनप्रा
माण्यपाद्युक्तेस्थानिवत्त्वं तर्हि प्रकृतेपि तुल्यं एतेन पूर्वत्रासिद्धीय इति निषेधो जोशिषेनेति निषेधश्च स्यादित्यपास्तं नपदां
तसूत्रोक्तरीसातपोन्पदांतजश्ले ऽप्राप्ते उत्तरपदलोपेतु अज्ञातादेशत्वेन स्थानिवत्त्वाभावात्तुल्यावधिकयाभसंज्ञा
यापदसंज्ञा बाध्यते तठन्नेतद्विनाश्रयाया विभक्त्याश्रयायाश्च बाध्यमानाभ्यचिंतयापवादत्वाद्बाध्यः षषष्ठेति। स्पष्टं चेदंस्ता
द्विषितिसूत्रेभाष्ये। शेवलसु। एषामिति शेवलादय आदिभूता येषां [illegible] ते षामिति सर्थः एषामकृत्तसंधीनां तृतीयादचइ
तिवक्तव्यं तेन सुपर्णिशो दत्तशब्दाह्वचिसुपरिकदूतिसिध्यति। अजिनांता। उत्तरपदग्रहणात्स्वर्वलोपोत्र। अत्रेसा। अत्रसर्वं

ल॰ श॰ शे॰

महत्वप्रति हूं हि हूस्वखंडी घ्यलप्रति हूं हीति भेदः क्वचित्प्रकृतिलिंगातिक्रमस्यापि सत्वेनाहकुटीरइति कासूः ग्रन्तास्वश
विकलेवाकू चकिं यत्तरोद्वयोरेकस्य निर्धारणेगम्येनि र्धार्यमाणवाचिभ्यः किमादिभ्यो डतरजिसर्थः द्वयोरित्युपलक्षणं
अत एव बहूनां मध्ये निक्षुक ग्भिं लं चिन्नं छति कतरो देवदत्त इति प्रत्यपइति सूत्रस्थभाष्यप्रयोगः संगच्छते। एतच्चनपितुमे
वसूत्रे एकग्रहणं। द्वयोरितिनिर्धारणमष्ठो मा[?]ख्यानादेवभविष्यतीसत्वं। अत्र निधारणंनप्रत्ययार्थः तेविवापिप्रतीयमा
नतपामलम्मत्वात्किंतु विषयनिर्देश इति हत्तो। [?]ावहूतं। प्रसाख्यातमिति क्षेपार्थस्य त्वनभिधानात्र अत एव ततो डतर
ज्ञा। म्राकेरइति पूर्वसूत्रस्य हूयोरित्यस्य प्रसारव्यानभाष्य[?]व्याख्यावसरे केयटेग्रंथेद्रसर्थः अत एव कतमाकत्तमेषामाटयेतेति
पहद्विलप्रकरणे भाष्यप्रयोगः संगच्छते तेनकतमोभवतां मध्यापकः शूराे देवदत्तोवेति सिद्धंवायहणमितानचाव्ययमेवे
नाम्नामिसस्याधिकारत्वात्तदनुवृत्तेरेववामिद्वेवाग्रहणंव्यर्थमितिवाच्यं। तच्चिह्नन्तिज्ञापनार्थत्वात्तेनडतरज्ञिषेपनाकच्। महा
विभाषार्थयेति अतएवावक्षेपणइतिसूत्रे भाष्येकरतयोरर्थयोर्विशेषइतिप्रयोगः संगच्छते तत मादयः प्रागवक्षेपणेकृनोनिमो॰
प्रत्ययाइति तु प्रापिकमितिभावः किमइतिबहूनां सीनेधित्यादिभाष्यप्रयोगादितिभावः एकाच्च। प्राचामितिपूजार्थे। वाम
स्ये[?]लेमहाविभाषयैवसिद्धेः अकजर्थमपिनतस्यानिवृत्वाद्धितिस्पष्टं भाष्ये। येनेतरइति अवक्षेपणाइतिकरणेल्युद्धितिभा राम॰

वः इवेष्वार्थगाथो यमानत्ववृत्तिविषयत्वमानात्मातिशयद्विकाल्कानुपयदुपमेयंमात्रातिक्रान्तिस्मेदित्यर्थः प्रतिकृतिवल्लिङ्गायवचनंतु
विशेष्यवदेव हरीतक्यादिषु व्यक्तिः रि स्यत्रपाठात् तेन चञ्चे मनुष्या विंसेषद्विवलकानामिति । प्रतिमांगृहीत्वा भिक्षार्थं भ्रा
म्यन् भट नामिसेर्थः तन्तेदायतनेषु प्रतिष्ठापितपूजार्थप्रतिमासु चित्रेषु नटेषु च भ्रमात्मिका शिवा मेद्बुद्धिरेव न तु माद्दश्य
बुद्धिरिति प्रत्ययो सत्तैरेवाभावः स्पष्टं च चित्रनटविषयं तादृशी बुद्धी रसप्रकरणे शंकुकमतनिरूपणावसरे प्रकाशका
रैरुक्ता यस्तु तत्र तद्बुद्धे र्भ्रमत्वाभावोप्युक्तः सलनन्तरावतीर्णावाधायाएव बुद्धेस्तत्र भ्रमत्वेन प्रकृमान्त्रविरुद्ध इतिदिक् । अ
र्चासु पूजनार्थासु चित्रकर्मध्वजेषु चेति देवयथाद्विष्णुपाठान्तत्र नदोष इति तद्राजसंज्ञेतिसूत्रे केयटः प्रकृतसूत्रे वृत्ताव त्राव
ये तत् निवृत्तमिति अस्वरितत्वादननुवृत्तिरेवात्र निवृत्तिः शाखादिभ्यो यदिति पाठः यदिति पाठः सुरुग्मादीनामापुस्तान्त
रदर्शनात् । उगवादिसूत्रभाष्यविरुद्धत्वाच्च भम आत्मवान् अभिप्रेतानाम यथोनां पात्रभूत इति पावत । तद्विषयादितिद्वा
र्थेषय सर्वावयवकादिसर्थः भाष्योक्तथैवोदाहरणात् इवार्थविषय सर्वावयवकादिवार्थोपमानत्वतिवर्त्तमानात् छ इ स
र्थः अतएव शस्त्रीश्यामेसादेरिवार्थे छो न काकतालमिति दृष्टान्ते वार्थे न । काकतालीय इति काक इव तालमिव तिरवार्थे
इ तएव ज्ञापकात् सुपेतिसमासः तत्र पूर्वपदमुपमानकाकागमनपरमुत्तरपदं चोक्तपूर्वपदार्थसमानाधिकरणोपमानता

ल॰ श॰ शे॰

लपतनपरं समुदायश्चोपमेयदेवदत्तगमनसमानाधिकरणेनोत्पतनेन परः एवं चोपमानकाकागमनसमानाधिकरणो
पमानतालपतनेनोपमेयदेवदत्तगमनसमानाधिकरणं चोत्पतनमिति समासार्थः विशिष्टे विशिष्टनिरूपितोपमेयल
क्षोधात् विशेषणे विशेषणनिरूपितविशेष्यनिरूपितं तत्सर्वं वसति। तत्र तदुपमेयवाचकसमभिव्याहारे समासार्थोपमान
प्रयोज्योपमानभूतालकृतकाकवधोपमेयः <u>सामासार्थोपमेयवाचकसमभिव्याहारे समासार्थोपमानप्रयोज्योपमानभूता</u>
<u>लकृतकाकवधोपमेयः</u> सामासार्थोपमेयप्रयोज्यश्चोत्कृतदेवदत्तवध इति बोधः शब्दशक्तिस्वभावात् एतेन परस्परं सामा
र्थ्याभावाद्वृत्तिरुपमपि दुर्लभमिति अपास्तं तत्फलितमाह हकाकेत्यादि। अत्र सर्वत्रातर्कितोपनतत्वं साधारणधर्म इत्याह
तर्कितेति। पक्षे ठगिति। अन्यतरस्यां ग्रहणमनंतरठकः समुच्चयार्थमिति भावः एकशलाशब्दस्यांगुल्यादिषु पाठादिति भा
वः मध्ये प्रयोगात् पूगेति न स्वरूपग्रहणं व्याख्यानात् ग्रामणीवाचकपूर्वावयवकभिन्नात् पूगवाचकादित्यर्थः लोहितध्वजमद
ति लोहिताध्वजायसंपूगास्सम एवं लोहितध्वजः व्रातच्फञोः शरीरायासजीविनो नानाजातीया नानामनियतवृत्तीनां संघो व्रातः अ
जितिगोत्रकुंजादिभ्यः इत्सन्नेन अस्त्रियां किं। कौंजायनी। टिलोन्ये। बिलिविटिलसामर्थ्यादस्त्रियामिति अत्र न संबध्यत इति भा राम॰
वः तद्धितेषु तिष्ठाख्यानादिति भावः जानकि स्त्रिगतेः पर्श्वादिभ्यो अत्रास्त्रियामित्यनुवर्त्ततेनेत्यस्यभाष्यप्रामा

ण्यान्तेतेन पष्ठः स्त्री अष्टे टेग्यणा विधायकयोः षष्ठ्यसामर्थ्याद् असंबंधे व्यस्तत्वासंबंधे मानाभावात् अभिजिस्यद् इति अथ
सारेणं तावत् अल्समासार्थिकत्वेन गोत्रार्थकत्वादाभिजित्यस्य यमिति विग्रहेतु जस्यापत्यमिति यलोपः अभिजितकः अ
यम प सारेणं तेभ्य एव तेनाभिजितो मुहूर्तेऽस्यादोनमस्यष्ठं चैवं सर्वभाष्ये अनेमित्तिकत्वार्थमिति ननु तद्भावभावित
रूपं निमित्तं लं सह विधानेपि। तद्भावे तं भाव इत्यस्यैव तद्भावसमकालं भाव इत्यपि तदर्थात् तत एवधिन्विक स्योरिस
त्त्वलोप एवकार्यानधातुलोपइति गुणनिषेध इति ह्रकाराद्देश विधानाव्यर्थमित्याशंक्य तत्रस्या र्योनगुणवारणायत
दिति भाष्य उक्तं भिन्निचेन्न लोपवचनसामर्थ्यादत्वः परस्मिन्नित्यत्र तथानिमित्तलाना अथ णान्तंदंडवत्। ईडो दंडनं
अव स्पर्शेसा हचर्यात्। तद्यारर्थयोर्विषये स्वार्थेवुनित्यर्थः स्थूलादिभ्यः प्रकारो भेदः स्याद्वस्यंचव्याख्यानात्तद्धि निवर्त्तमा
नादि त्यर्थः जातीयोपवाद इति जातीयर्विधौभेद एवप्रकार इति जयादित्यमतेपवाद इत्यस्य परत्वाद्बाधक इत्यर्थः तत्रा
प्युभयं गस्वते इति वामनमते यथाश्रुतमेवच्छ्रवसां। अनसंतगतिरशेषतः संबंधाभावः सामिक्ष्यतमिति। समासेपिसा
मीसस्पक्रियाविशेषणासेनवारकत्वात्समुदायस्यक्तांतत्वं। क्रुहृहरोगगति कारकपूर्वस्यापि ग्रहणात् अन्तसंगतेतारिस
स्यपद्मपीलादिः प्रकृते सेवेतिसमस्तखेतदेकदेशसामिशब्देनेत्यर्थः अन्नसमस्तलेतत्संनिहितेनेत्यर्थः इदमेवेति। अस्यत

थापीत्यादि: बहुतरकमितियद्दितुबहुतरकंसुकरकमित्यादि तन्नाघंतात्स्वार्थेकन्वक्तव्य इतिवचनेनयावादिलात्स्वा
र्थेकनावासिद्धमित्युच्यतेतत्तदानास्यप्रयोजनं एतदेवाभिप्रेत्यैहंभाष्येप्रत्याख्यातं।एतदेवभाष्यंतस्याकृतिगणत्वेमानंवि
भाष्यषाग्रहणादितिप्राक्प्राचीनमितिहृपहृयंमहाविभाषयैवसिद्धमितितत्रस्यनिसंलेज्ञापकमितिभावः तेनाशि
तंगविलाघमाध्वितिबोध्यं।आशितागावइत्यादितुरवप्रत्ययप्रकृतेरर्थकथनंइयमभ्युच्चयमुक्तिः वृहतीजासंत्त्वाइतिब
हुवचनेनास्यापिग्रहात्जासंताच्छस्यास्यापि स्वभावतीतिस्सलाभात।अंचतेःख्रस्यनित्सत्वाभावायविभाषाग्रह
णमितिभाष्यसंमतः पंथाः प्राक्नइतितेनावक्षेपरणेकन्वेकत्विकऐवेतन्नापिकमित्युक्तं।बहतीजासंताःकन्व
च्छाःअदिक्स्त्रियामितिकर्मधारयगर्भोनञ्तत्पुरुषःप्रागितिअस्तासंतंप्राचिदेशेइत्यर्थकंनिर्दिष्टेगस्वतंत्वाधे
यप्रधानतयास्वभावाल्लिंगयोगिलिंगंचनपुंसकमेवलिंगसर्वनामत्वात्नस्त्रीत्वादिप्रकृत्यैसमहासंतविरोधापत्तेरेकव
चनंच।एवंचग्रामादिवधिकप्राग्देशवृत्तयआम्नाइतिबोधः तदाहप्राचीनमिति।स्वदंसंस्कारपक्षेइदंयदाप्राग्दिशवा
स्तदेशकालस्याम्नादिबोधकास्तेभ्यऽस्वस्तदेपस्थितविशेष्यलिंगसांगमानाभावात्प्राचीनाआम्नाः प्राचीनंगनाम
दितिअत्रप्राच्यांदिशीसर्थेस्तासंतात्प्रागितिप्रकृतिः साचाव्ययत्वात्स्त्रीस्यानिवत्यत्रेभाष्येचायंप्रयोगः जासंताद्ध राम॰

ज्ञासंताद्वंद्धुनिवर्त्तमानाज्ज्ञासा अपहृमलक्षकादिस्यर्थः जातेयंजक मितिवध्मते स्मिन ज्ञातिरिति व्युत्पत्तेः अत्र प्रक
रणबाधेन बाचकत्वंवक्तुं शक्यं रमुक्तं चेति परेस्यानांता। म स्यान शाब्दस्तु त्वबाचो तुल्यरूपार्थे न चेत स्यानांत मर्थं व
द्रूवतितदाप्रत्ययइत्यर्थः इतिशब्दादर्थवदिति लब्धं अनुगदतीति अत्रार्थं अनुगादिशब्द इत्यर्थः अस्यानि सत्वादविम
हं दर्शयति स एवं वति अनुयायादिवत्सुप्पजातावितिणिनिः विमारिणेगा। अणि। नुण इत्संता णानुवर्त्तते इन गाणितिप्र
कृतिभावः क्रियाजन्मेति। अत एव त्रिः प्रवृत्तोद्विः पचतीति नावृत्तो पंचादिशब्दोस्तत्संख्यासत्ति पराणस्तसैव भुजघो
तकस्तेषां च क्रियाया मन्वयः सूत्रस्वरसात् द्विदशाइत्यादौ समासएव द्वादिशब्दानां तत्परत्वघोतक इति उक्तार्थे
त्वान्नसुच् समुदायस्यापि रसमासत्वात्सभुंक्ते इति वर्त्तमान प्रयोगः त्रिरावृत्तादशेसाद्वावृत्तिः क्रियाजन्मगणनेव
त्वसुच्। संख्यायाः किमितिगणनेवृत्तिः संख्याशब्दानामेवेति प्रश्नः भूरिवारानिति। नायं संख्यावाची लोके गणनानू
यामप्रसिद्धेरिति भावः वहुबहुस्तु संख्यासंज्ञकत्वात्तत्कार्यभागित्युक्तं। तदभावे हि क्रियाजन्मगणने गम्ये इत्यर्थः
स्यादिति त्वसर्पे। वारशब्दः कालपरः सप्तभोजनस्य मा सवृत्तिका लाध्वनोरिति द्वितीया। पचपिर्द्रव्यगुणयोगे एव न
योग्पजन्मा प्रसिद्धमेके वते षामुत्पत्तिः क्रियायास्त्वनेका लाध्वनोरिति द्वितीया। पघपिद्रव्य~~गुणयोगेणनयोग्पजन्मा~~

ल० श० शे०

याऽपि निवृत्तभेदस्या धात्वर्थवाच्येन तत्संभवः तथापि क्रियाग्रहणं स्पष्टार्थं साध्यस्य भावे वयत्र क्रियातत्त्वेन स्पष्टस्पष्टार्थं तु न
तत् द्विवचने चेति द्विराद्वृत्तिर्द्विः प्रयोगः द्विर्बद्धं सुबद्धमित्यादि प्रयोगविरोधात् पंचकृत्वः कृत्वोकटान्द्विः कर्तृसाद्गु
ण्यभूतक्रियायोगकारकविभक्तेरिवक्तेरिव क्त्वस्यापि साधुत्वमिष्टमेवेति सर्षं हरिकेपटादिग्रन्थेषु स्पष्टं निरूपितं द्वि
पाकाविसादेन सुजादिक्रियाजन्मगणनस्याभावात् तद्गणनार्थत्वे हि पाकाविसादेर्द्विवचनाधनापत्तिः अत एव द्विः प्र
योगाविति न तदुक्तं भाष्ये द्विपाकाविसत्त्वकस्मान्न भवति नेतत्क्रियागणन अभिमुखा प्रवृत्तिरभ्यावृत्तिरिति। सा च जन्म
रूपा एवं च नेतत्क्रियाजन्मगणनमिति तदर्थं इति निरूपितं भाष्यप्रदीपोद्योते। यद्यपि संख्यागणनात्मिकैव तथापि गणनद्
तिगणनापेप्रभित्वास्तेषामेव ग्रहणार्थं तेन पुनः पुनरादिशब्दान्नेति तिद्धि कृविभाषा यावत्स्वविप्रकृष्टकालक्रियाजन्मगण
न वृत्तेरित्यर्थः प्राचुर्येणेति व्याख्यानादिति भावः भाव इति प्रचुरस्य वचने बोधने स्पष्टति प्रातिपदिकात्प्रत्यय इत्यक्षरार्थः प्रचु
रार्थबोधकात् इति प्रथमासमर्थात्स्वार्थेमयड् इति यावत् अधिकरणे इति। प्राचुर्येण प्रस्तुतान्नादि वचनात्प्रथमासमर्था
दधिकरणेऽर्थे प्रत्यय इत्यर्थः प्रकृतेति लुप्तसप्तम्यं तंतत्त्रवत्तेरन्नादित्यर्थः अत्रपक्षेवचने इत्यत्र प्रकृत्यर्थोऽविवक्षितं तेन
भवन्मयपोऽप्यापतिनावनीयतिरित्यादेः प्रकृत्यर्थाधिकरणमात्रेमयडुपपन्नः तेनैवान्नार्थं द्व्येतत्ततात्पर्यं व्याख्यानात्स्वार्थि राम०

कप्रकरणपाठस्त्वाद्यपक्षे चरितार्थः वस्तुतोऽत्र स्वार्थिकादृष्टस्य प्रायेणेत्यादि। प्रकारवचने जासंतात्स्थुवंधुनि देवतांतात्तादर्थ्ये
यदित्यादौ वाचकतया स्वप्रतीतेरिति बोध्यं तत्र ग्रहणं वाक्यभेदेन प्राचुर्याभावव्यसंतस्वार्थिकमपइंर्थं तेन चिन्मयं ब्रह्मेत्यादि
सिद्धं। प्रवाग्मम पीतिटिल्वान्ती प्। ममहत्वा वद्धत्वविशिष्टेऽर्थे प्राचुर्यार्थे वर्त्तमानादित्यर्थः मोदकिकादावचित्ते निठक् स्वार्थि
केऽपि लिंगानि क्रमः कुटीरवत्। भेषजमिति भिषः षुक् ह्रस्वश्चेति सुत्रारिता द्भिषज्‌शब्दादित्यर्थः रण्पत एवाति पातना
देकारः देवतां तातदर्थे वस्तुनीत्यर्थः वैधे कर्मणि सज्यमान इत्यादि द्रव्यं मंत्रस्तुत्यं च देवतात्वं तदुक्तं भाष्ये दिवेरैश्वर्ये
कर्मणो देवत्वं स्मात्स्वार्थे तलिति भेनं देवं देवत्वमिति सिद्धं तत्र्ध्वनयनाह पित्र्ये देवत्यमिति। एतेनपित्र्यं षुदेवत्वजातस्यभावादि
दमयुक्तमित्यस्यास्तं। नवसेम्यादि वार्त्तिकैर्विधीयमाना अमी तस्वार्थिकाः साधारणादिति। अत एव निपातनात्स्वादेशस्य
दीर्घः सहसमानं धारणमस्येत्यर्थः अनेकं पृतविशिष्टं संबंधमित्यर्थः देवतेत्ति लिंगानि क्रमात् त्रीत्वं। वर्णोचा। वर्णो कि
लोहितं रुधिरं यावदाम्रपमवस्थानं योग्यत्वाभावो निसत्वं। लोहितादिति। अस्मादेवज्ञापकादसंतस्वार्थिकानां सुबस
तेः प्रागेवोत्पसंगीकारेणांतरंगत्वात् प्रावृत्तलिंगबोधकप्रत्ययस्य बाधनं स्वार्थिकेन वाध्यवतीत्यर्थः अत एव ङ्याप्प्र
त्याप्यत्र प्रकरणे संबंधः तेनेतादिभ्यो संतस्वार्थिके एतिकेसेवनं लानिकेति वेलक्ष्येणोति लक्ष्यं गोपसर्थः उपायादिति अचिति

वक्तव्ये ह्रस्वग्रहणादीर्घस्य स्थानित्वं एतेन नासस्यात्तत्त्वासमर्थ्यो ह्वेलोपाभाव इत्यपास्तं। व्याख्यानाच्चवा चोऽव्यात्ततो सेनो
क्ते र्थोपस्या इत्यर्थस्तदाह संदिष्टेति। न युक्तानतच्छेदेन वाक्यं वा चायुक्तोऽहाग्व्यात्तेनार्थप्रतिपादककर्मशब्दादित्यर्थः
तेन स्वपं वा चाकथनपूर्वकं यत्कर्म क्रियते तत्त्वकार्मणं तदुक्तं भाष्ये तदित्यनेन किं प्रतिनिर्दिश्यते वागेव। यदेव चोमा
ह्रियते तदेव कर्मणा क्रियते इति अत्र वागेवेत्युत्तरस्येवकारेणात्मनायोपामिसंशं सम्बन्धो लभ्यते क्रियमोर्हत्सर्गतत्त्र
ककर्तृकत्वं चमतीयते। यद्वा चावदतितत्कर्मणा कुरुत इतिशुसार्थानुवादरूपलाघदेवेत्यादिभाष्यमतयुक्तालिंकोवाचा
कथनं विनैव यत्कर्म क्रियते तत्रमाभूदिति। एवं च मंत्रमंत्रविशेषप्रयोगपूर्वं क्रियमाणकर्मविशेषेहृत्ोपमिसाङ्ः इदंल
पाकर्तृ यमितिसंदेशवाचं भ्रुलायत्कर्म क्रियते तत्कार्मणमिति वदतः कैयटस्याशयस्तु चिंत्यः वार्त्तिकं भ्रुवेति मूलं कैयटा
नुसारेण। क्षेत्ररूढा इति तन्त्रोऽसन्नाद्यर्थः प्रजानातीति प्रश्नः निषोपमितिहृतोचेदंस्पष्टं। भाष्ये निषेधस्यागणनात्रास्य
नित्यत्वं प्रसंयोगान्तरं तस्मादस्यापवादत्वात्रभविष्यतीति परे। मंगलामंगलेत्यादि प्रापिकमित्य पातंभाष्यानुक्तेः अत्रालो
पैश्वर्यैतलोकादीनामेवग्रहणं न तदर्थकैकशब्दस्य तत्त्वलेमानाभावात महेतापि न त्वाप्यंतस्याप्रसिद्धतरत्वेनास्यार्थशब्दे
नन्ग्रहणं। संख्यैकस्त्वस्या वाचिन एकत्वविशिष्टार्थकात्प्रातिपदिकात्कारकाद्धमित्यर्थः एकार्थाएवेति एकवचनशब्देना

च तस्र एव गतस्वेच्छ इति भावः घटं घटमिति तत्तं ज्ञासि घटं घटमितिव त घटौ घटौ ददातीत्यपि बोध्यं मेवं भवद्भस्यभिमा
नः पदशः स्वरशाइतिप्रयोगात्तत्त्वोपि वृत्त्या वेकत्वविशिष्टस्यैव बोध इति जातिशब्देष्वपि शस्य इति पद एकवचना
दिति घटौ घटौ ददातीत्यादि बोधेश मो साधुत्वापतिके चित्तवस्तुत एकवचनादिति संख्यातिरिक्तार्थानां परिगृहीत
तेकत्वानामवबोधे सर्वानुवादकं अत एव माषं माषं ददातीति न किंतु द्वौ द्वौ माषौ ददातीत्येव तेत्र निबोध्यं अत्र द्वि
वचनेत्वेवीप्सायामित्यनंतरं द्रष्टव्यः संख्यैकवचनाद्वीप्सायां च वात्सार्थेपि सहचाभिधानस्याभावादेकशब्दाद्वेवातेनेकश
ब्दाद्वीप्साशस्य भावे द्विवचने ततो संत स्वार्थिके शसि पक्षे जाते एकैकश इत्येतत्सिद्धिः। नचैवमेकशब्दस्तु नेसंदेहः
स्यात् शस्त्वेव्याख्यानतो लोके प्रकरणादितो निर्णयात्। नचास्य शस एकं बहुव्रीहिवदिसपवादत्वाभावादेकश
ब्दे परत्वाद्द्विवचनमेव माप्यमिति वाच्यं तत्रापि नसंबोप्सयोः स्येव द्वित्वसत्वात् तदनुवादेन बहुव्रीहिवद्भावस्ये
वेतन विधानात् इति ध्वनितं चेदं सर्वस्य द्वे इति सूत्रे भाष्ये इति भाष्यप्रदीपोद्योते निरूपितं यापंचमीविहितेति प्रतिनि
धिप्रतिदाने च त्येषेत्यर्थः आद्यादिभ्य इति अयमेवमार्वविभक्तिकस्तसिः चादित्रतइति बहुधा सोन घमात्रिकेण लो
के गे त्वत इत्यर्थः फलितमाह। मानतिक्रम्येति। न हीयमान। हीयमानेन पापेन च युक्तादित्यर्थः अर्जुनतत इति पक्षे इति

ल·शु०शे०

शेषः। प्रवाहिकाविषूचिका। अभूते तिगम्यमाने इति शेषात्तद्भावेतिकरणांततीयपाठसमासः अभूततत्पदेन कर्तृषष्ठ्यंते
नास्य समासः अभूतत्वं च प्रत्यासत्त्या तद्भावशब्दघटकतच्छब्दार्थकरणं कत्वेनैव ग्रास्वा[illegible]पेण रूपेण आगभूतं तेन रूपेणात
त्स्मभावे इति फलितं। एवं च यत्र प्रकृतिस्वरूपमेव विकाररूपतामापद्यमानं विवक्ष्यते तत्रायं प्रत्ययः संपद्यते सादेः संप
द्यकर्तरि वर्त्तमानादित्यर्थः अस्मादेव निपातनात् संपदेर्भावे क्विः दिवादित्वाच्छ्यनुः संपद्यस्य कर्त्तेति तिन् सुहृषः एवं च सं
पत्तिकर्त्रे बोधकात् विकारकाच्च कात्त्वपः तस्य च प्रकृतेर्वा नेमानत्वं गौरणपाहेसा। अत एव महद्भूते सादेनात्वे सामाना
धिकरण्यनिबंधनं पुंवत्वं च भवति तदा ह्यविकारात्मतामित्यादि चकारोक्तो दान्तत्वापायकारो वैत्यत्र सामान्यग्रहणाविधा
तार्थः च्व्यंतत्वादिति ऊर्यादिच्वीति निपातत्वेऽव्ययत्वमित्यर्थः ब्रह्मो भवतीति अत्र भवनकर्तृत्वं प्रकृतिभूतस्यान्नब्रह्मण एव विकार
भेदेन बोध्यं। कृष्णीकरोतीत्यादौ कर्मत्वमप्येवं अत एव संघीभवंति ब्राह्मणास्तद्भवति चैत्र इत्यादौ वचनपुरुषव्यवस्था। अत्र
तु प्रकृतिविकृत्योः रूभयोः कर्तृत्वं तत्र साक्षाद्विकारस्यैव स्वर्णं पिंडः खदिरांगारसदृशे कुंडले भवत इति यस्मिन्नास्थ भा
व्यप्रयोगे विकृतेः कर्तृत्वात् अकेत्वं संपद्यत इत्यादौ च्व्यंतस्य वाक्ये लोके प्रकृतेरपि कर्तृत्वदर्शनाच्च अयं प्रयोगो युक्तश्च प
पदेद्द इति सूत्रे भाष्ये स्पष्टः अनारोपितात्तथाभूते आरोपिततद्भावसंपत्तौ विवक्षित इत्येवेश्वरप्रसादादिना महति शुक्लमह

राम०

सत्तोऽभ्युच्चिरं न एव च्व्यंतार्थस्य गोभवदित्यादौ गौणत्वेन प्रगृह्यत्वाभावमिच्छन्त्यो नः च्व्यंतस्य प्रतिषेध इति वार्त्तिकमोत्स्वंत्रेभा
ष्यप्रत्याख्यातं। कारणेभूतोऽदं दूदुसा घमाध्येव। तत्राकारणत्वाधारोपपूर्वककारणत्वादिषु ध्वाञ्च्विरिति तु न युक्तं। अगोत्वा
रोपपूर्वकगोत्वबुध्यां च्वौ गोभवदित्यादौ च्व्यंतप्रतिषेधस्यावश्यकत्वेन तत्प्रत्याख्यानपरभाष्यविरोधापत्तेः प्रकृतसूत्रभा
ष्येपि ध्वनितमेतत्। संज्ञोपसर्जनीभूतानामिति वार्त्तिकप्रयोगे एकार्थीभाव इति भाष्यादिप्रयोगे च वृत्तिवाक्ययोरसंतभे
दात् उपसर्जनत्वसैकार्थत्वस्य चारोपितस्यैव सत्वात्तच्चिः तत्त्वदत्वस्यैव तत्रारोपेरोपकार्थत्वस्य सुतरां तत्वं अमतीभूत्वा
मो स्त्रीभवतीत्यादि तु छंदसि अभूततद्भावसामर्थ्यात्संपद्यकर्तृत्वलाभे द्रुहर्णा पत्रं संपद्यकर्तृत्वमवतकारकांतरत्वं त
त्रयथा स्यादित्यादि त्यादि सिद्धं। अन्यथा प्रत्ययविधौ तदंतविध्यभावान्नस्यात् अनेनांसलोपेयथा यथमी त्वादि। शाक
त्येऽइति अभूततद्भावइत्यपि बोध्यं। कृतं। सर्वावयवोपेतं वाक्यमेवेति न तु च्विरित्यर्थः तदधीनः अभूततद्भावइति निवृत्तं
देवमनुष्यास्तीति कृभ्वस्तीति च निवृत्तं। वंदेरमेवेति देवा वंदते रुरमेव सर्वः पुरुशब्दो बहुवाची। बहुत्रेति जीवतो जंतोमनो
बहुषु विषये त्रुगच्छतीति वहून्विषयान्व्याप्नोतीति वार्थः अव्यक्तानुमंडूकत्सु साकृभ्वस्ती स नुवर्त्तते संपदेति निवृत्तं मे
वान्तुतनोन्मूनमित्यजवर्जं सस्यद्यजेपक्षयानूनमित्यर्थ त्वनपटपटाकरोतीत्याद्यावव्याप्तेः विवक्षितेऽइति अन्यथाडा

चिद्वित्वं हि तद्वित्वं चाधोनेकाच्त्वेऽजिसन्नोम्याश्रयः स्यादिति भावः बहुलग्रहणाद्द्वितीयाकरोती सादो न द्वित्वं डाच्यभिव्यक्ते ला
तादिरा जम इति विशेषणार्थं तेन नाभाष्टं यि याइत्यादौ डे· डोदेशे निष्पन्नस्यानुकरणे पटापती सा शाविवनाभा इति भवती
त्यर्थेस्य षत्वारणायेति भाष्यस्वरसः अनेकाच्त्वं इति द्वजवराधादिसपनीये सर्थः पटिनीति अव्यक्तानुकरणेति परस्
पं कृञो द्वितीयकृञ इति समं मांमांता इसेत त्यं यतमनुवर्त्तते बीजेनेति बोजावापेन सह स थः कृष धातुः करणं विक्षोपणं
तत्र किं निष्कुलाकरोति शत्रूनिति शत्रूनिति आनुलोम्यमारा धयचि तानुवर्त्तेनंतव किं सुखंकरोसेषधचित्तपीडनं प्रातिलोम्यं
स्यलाकरोती तिकरोतिः पचुसर्थे। सत्यसाधुससे। इति तद्धितप्रक्रिया।। ।।सर्वस्य द्वे। नच माक्यादि द्विलवारणापावश्यकेन
पदस्येस पकर्षेणामि द्वे सर्वस्येति वाच्यं एकाजद्विर्वचनन्यायेन च सर्वावयवद्वित्वसिद्धिरितिवाच्यं। द्वितीयषष्ठ्युच्चारणेन
स्थाने द्विर्वचनत्वबोधनात्। द्विः इत्यस्य संख्यायां पक्षापां शब्दानुशासनप्रस्तावाद्धे शब्दरूपप्रसासम्भास्यानि समानाकारस
र्वस्य पदस्य स्थाने भवत इत्यर्थः अन्यं थे काचो द्वे इत्याद्यविवेचारणक्रियापेक्षया पदस्येति कर्मषष्ठी स्यात्। तनेपोना पु राम०
नःपौनः पुन्ति क इत्यत्र ष्यञ्‌ठञौ सिद्धो। तत्राहि पुनः पुनर्भवित रिवर्त्तमाना सुनः पुनः शब्दाभावे भवेच प्रत्ययः अन्यथांत
रंगलात्सुपि लुक्लाच्चा व्ययात्सुपोलु पाकबोष्मा ऽपेथेद्विल प्र वृत्ता येव त्वेपिस मासग्रहणकृतनियमेन स्यातं अेणापि प्रये

गार्हार्थवत्समुदायविषयके न प्रातिपदिकत्वाभावात्स्मिन्स्मात् स्थाने द्विलं तु स्थानिवद्भावात्प्रातिपदिकत्वं प्रत्ययलक्षणेना
प्रत्यय इति निषेधाप्रवृत्तस्स्थानिवत्वेन प्रातिपदिकत्वेऽस्मात्स्मिन्स्मात्स्थाने ऽतिदेशेनादेशेन तत्सुलभं। न चैवमपि तत्र प्रकृ
तिकसुबंतत्वं दुर्लभं पुनः सुबुत्पत्त्या सुलभत्वात्। यद्वा तत्तमं वधिभावे इत्याद्यर्थे प्रातिपदिकात्प्रत्ययः इत्येवार्थः सुच
कुत्सिते इति सूत्रभाष्यात् घकालेति ज्ञापकाच्च मतिसंभवे सुपध्यवहितद्रूत्यन्यत्र तत्र द्विशब्दत्तशब्दरूपमादेश इत्यर्थे
के द्विरिति वक्तव्ये द्वे इति द्विवचनबलेनानन्तमिताघयवभेदसमुदायस्यैवादेशस्योपस्थितपदसमुदसमुदायात्मकस्य
विधानात्प्रत्येकमप्यनयोः पदत्वमित्यग्ने इत्यादौ पूर्वरूपादिसिद्धिः एतेनैकैकस्मिन्नादौ बहुव्रीहिवद्भावेऽपि नद्वयमवयोः
सुब्लोमानाभावात्सुब्लुगनापत्तिरिति परास्तं अन्तर्वर्तिद्विर्वचनसंहितापाननित्यत्वसंहितेकपदे इत्यस्य समासग्र
हणाद्द्वंद्वपदे एवं तन्नियतता बोधकत्वात्समुदायस्यापि स्थानिवद्भावेन पदत्वमिति आम्यच क्षिपत्वमिदेवदत्तेत्यावाम
एकान्तरतासिद्धिः कस्कादिषु कौतस्कुत पाठेन कृतार्थमिकद्विर्वादप्रातिपदिकत्वेऽपि तद्धितोत्पत्तिज्ञापनेन द्विः प्रयो
गपक्षेऽपि न दोष इत्यस्मेपदस्य सपकर्षेऽपि प्रपचति प्रयतीति सगतिकस्य द्विर्वचनं सगतिकस्येति वार्त्तिकेन सिद्धमिति दिक् नि
त्यमाभीक्ष्ण्यं व्याख्यानात्तच्च पौनःपुन्यं तदाहाभीक्ष्ण्ये इति ननु यां क्रियां कर्त्ता प्राधान्येनानुपरमन् करोति तत्रिसंपुनः

क्रियायाविच्छेदे नो सन्निरामीक्ष्ण्यमिति तयोर्भेदः स्पष्टः केपटादिभिरुक्तत्वेनेदमसंगतमिति चेन्न । मानाभावात् तत्र घ आभीक्ष्ण्ये
वर्त्तते तत्सेदं ग्रहणमिति प्रकृतसूत्रस्थभाष्यविरोधानलंनत्तुक्रियावाचकत्वमतो न द्वित्वं परेर्वर्जने । वर्जनद्योतकस्य परे
रित्यर्थः उदाहरणे पंचम्यर्थवर्जनरूपसंबंधस्य परिर्द्योतकः पंचम्यपाङ्परिभिरिति पंचमी । परित्रिगर्त्तं वृष्टो देव इति
समासे तु न द्वित्वं कर्मप्रवचनीयानां स्वयोगविहितविभक्त्यर्थसंबंधपरिच्छेदकत्वात् समासे विभक्त्यभावेन तत्त्वासंभव इति
परेर्नैरर्थक्यात् किंच वाक्ये दृष्टविभक्त्यर्थद्योतकत्वेनात्र समासेऽपि च शक्तिकल्पनेन परेस्तद्योतकत्वाभावः न हि समासस्य
यदर्थान्तर्भावेण शक्तिस्तत्र तद्योतकापेक्षा अत एव घनश्यामादाविवाद्यप्रयोगः परिशब्दस्तु साधुत्वा ~~भावः न हि समासस्य~~
~~यदर्थोऽन्त~~ र्थमेव वृत्तौ प्रयुज्यते । समूलकाषमित्यादौ कषेरिकः तदुक्तं भाष्ये नात्र परिवर्जने वर्त्तते कस्तर्हि समास इति वाक्या
देशाविनापि कोपास्यमर्त्तनकृत्स्नपोः शिष्याद्यसंभवात् द्रुहत्सो द्विरुक्त इति वीप्साविषये इति भावः अस्य सूत्रस्य वीप्साया
मेव प्रवृत्तेर्भाष्यसंमतत्वात् । अत एवैकैकस्यादौ न बहुव्रीहिवत्तथा सति सुप्लुकि दध्यादौ विभक्तिरहितस्यैवात्रापि ता — एम॰
दृशस्यैव साधुत्वापत्तिः अनेनैव द्वित्वे विधोपत इति तु न युक्तं शाम एतदपवादद्वित्वाभावस्यैकशब्दस्य सिद्धेः अत्रेदं बोध्यं अत्र
र्थैकशब्दस्यापि तदर्थे वीप्सायां द्वित्वापवादः शासेवा । संख्याशब्दातिरिक्तशब्दार्थानां परिग्रहो तेकत्वानामेव वीप्सात्वेन

तस्याप्येकवचनत्वात्। किं चात्र स्त्रममपि परिमाणविशेषवद्भसत्व इति सूत्रे भाष्ये कैयटयोरुक्ततया प्रस्थाद्यर्थानामिमास्यापि परि
गृहीते तेकृत्स्नैषवक्ष्यपा। एकैक शब्द इति भाष्यप्रयोगस्योपपत्तिरुक्तस्यमत्र विस्तरः तेनेति। अत्र सुप्लोपशब्देन तन्निमित्तं प्रा
तिपदिकत्वेन लक्ष्यते। यथा सुबुत्पत्तिरपि वक्तः। व्याख्यातं भाष्ये एवमेव। गोस्त्रियोरिति ह्रस्वस्तु नातिदिश्यते तस्योपसर्जनार्थ
निमित्तत्वात् बहुव्रीहिवद्भावादेवेति मध्यमणिन्यायेनोभयान्वयि। सुबुत्पत्तेजातस्य प्रातिपदिकत्वस्यैकदेशविकृतन्यायेन सु
प्त्येपि समत्वं कार्यकाले यं प्रसुते तेन च पुनः प्रातिपदिकत्वे। सुविति न चात्र द्वयोः सुपोर्लुकि तदर्थस्य प्रातिपदिकार्थत्वाभावे
णद्वित्वाद्यनापत्तिः व्याप्तिविशिष्टस्य कर्मत्वादिबोधार्थं तदुत्पत्तेः सुलभत्वात्। एकैकस्मेति द्वयोरपि सुपो लुकि पुनः स
वादिपठितेकशब्दात्तेन सर्वनामत्वात्तस्मैभावः इह पुंवदिति बहुव्रीहिवत्त्वातिदेशेनोत्तरपदत्वस्य कार्यैर्न भिन्नार्थत्वामा
वेन च सामानाधिकरण्यस्यात्रसत्त्वात् स्त्रियाः पुंवदित्यनेनेति भावः। अन्तोदात्तत्वानेति। अनुदात्तं चेत्यस्याधिकारत्वेऽपि भाष्यप्रा
माण्यान्नेहोपस्थितिः अत एव बहुव्रीहिवद्भावे प्रकृतेपि कर्मधारयवद्भावः किंच प्रियादिषु प्रतिषिद्धं पुंवत्तस्यापि विधाना
र्थिकर्मधारयवद्भावः अत एव पूर्वसूत्रयोः कर्मधारयवदिति नोक्तं प्रियादिषु पुंवद्भाव इति पुंवत्कर्मधारयेत्यनेन। गुणवच
न श्रेहाकडारसूत्रभाष्यपरिभाषितं इति बोध्यं। प्रकारः सादृश्यमिति योगिकत्वं उपमानत्वं उपमानत्व दू भिन्न इति बोध्य इ

ल॰ श॰ शे॰

तिपरे आनुपूर्व्ये इति वार्त्तिके सुकर्मधारयवदिति न संबंध्यते तन्तुदाहरणेषु भाष्ये सुपलोपादर्शनात्। संभ्रमश्चादरो भ
यं वा क्रियासमभिहारे चेति पौनःपुन्यं भृशार्थश्च क्रियासमभिहारः लोट् एवेदं अत एव क्रियासमभिहारे लोडिति सूत्रे क्रियासम
भिहारे लोण्मध्यमैकवचनस्य द्वे भवत इति पठित्वा तस्य लोट् ज्ञापकत्वमुक्तं अस्मिंश्चास्य लोट एवोदाहरणमुपन्यस्तं अत एव प ८
दे तेन द्वित्वं यत्तु लोटः समुच्चयादिष्वपि विधानेन केवलस्य तद्द्योतने सामर्थ्याभावाल्लोटि द्वित्वं। यङ्स्तु तद्वृत्तिरिक्तार्था
भावाद्यङः वृत्तद्योतनसंभवाद्यङः तेन द्वित्वमिति तन्न। स्वकजादेरनेकत्र द्योत्यार्थे विधानेपि केवलस्यैव प्रकरणादिना तत्त
दर्थद्योतकत्वं तथा दृष्टत्वात् भृशार्थे द्वित्वफलकत्वे भृशार्थ इत्येव सिद्धे क्रियासमभिहारपदं व्यर्थमत आह पौनःपुन्ये
पीति इदमेव ज्ञापकं पौनःपुन्यस्य केनचिद्द्योतने सौत्रद्वित्वाप्रवृत्तेरिति पौनःपुन्यं यङः तेन सौत्रं द्वित्वमिति भावः भुक्त्वा भो
जमित्यादेरेवाभीक्ष्ण्ये द्वे वाच्ये इति भाष्यपठितवचनान्तरेण द्वित्वं मूले लेत त्कृदंते वक्ष्यते पुनः पुनः क्रियायाविच्छेदेनासन्नि
राभीक्ष्ण्यं तदेव च नित्यत्वं। भुक्त्वाभुक्त्वेत्यादावपि विच्छेदिका क्रिया चोपात्ता व्रजनादिरूपैव गत्यन्तरोपस्थितकल्पने मानाभावा
त् एवं च भुक्त्वाघंतद्वित्वेनैव व्रजनाद्याभीक्ष्ण्यस्य द्योतितत्वान्न भुक्त्वाघंतसमभिव्याहारे तिङः तस्य द्वित्वं। कर्मव्यतिहारः राम॰
क्रियाविनिमयः नित्यमेवेदं द्वित्वं। बाहुलकं तु समासवद्भावस्यैव तदाह बहुलग्रहणादिति अत एवान्यशब्दस्य समासव

द्वावरहितमेवेतरशब्दस्य तत्सहितमेवोदाहरणं भाष्ये परस्परशब्दे परस्परांचेति वार्त्तिकप्रयोगात्समासवद्भावाभावः अ
न्यपरेतरव्यतिरिक्तेषु तु नास्य प्रवृत्तिर्बाहुलकादेव अन्येषां कर्मव्यतिहारबोधकत्वाच्च अन्योन्यादेः कर्मव्यतिहारः स्फुट एव
अन्योन्यस्मै इति। अन्यस्मै इत्यस्य द्वित्वे पूर्वपदस्थ सुपः सोरुपसिद्धिः। इतरेतरेतरेषामिसादौ तु एकैकस्मै इत्यत्रोक्त
रीत्या सर्वनामत्वं वार्त्तिकेषु कर्मधारयवत्सद्भावसंबंधबोधनाय समासवदित्युक्तिः सुप्लुग्विधिनैव सिद्धे समासवद्विस्
क्तिरन्योन्यमिति तानुदात्तबाधेनांतोदात्तार्था ऽकस्कादित्वादिति कुबोः कःपौ चेति बाधित्वेति भावः सिद्धांतिमतमाहास
त्त्विति तदुक्तं हे हूनेनोदाहरणमादरणीयमिति तदतिरिक्तोदाहरणाभाव इत्येवं परतया नादरणीयमित्यर्थः
दलद्वये इति समासवद्भावे तद्भावे च। इतरेतरमिसादौ पूर्वखंडस्य सर्वनाम्न इति पुंवत्वेन यद्यपि सिद्धं तथाप्युत्तर
खंडे टाब्भावार्थं बाहुलकमावश्यकं क्लीवे चेति अन्योन्यमित्यत्र पूर्वपदं प्राप्ताद्विरह इत्यर्थः इदमुपलक्षणं परस्प
रमित्यत्र पूर्वपदे नपुंसके सोरमभावस्य परस्यात्स्मादित्यादौ व्यवस्थाभावेपि सर्वनामत्वस्य च। इतरेतरमित्यत्र चेति।
उतरादिसूत्रे सर्वादीनीति सूत्रस्य भाष्ये रीत्या विहितविशेषणाददृत्वेन सन्यो मोलुक् चेति सादेशो विधानं त्वन्योन्य
मित्यादावसमासे चरितार्थमिति भावः प्रकृतवार्त्तिकेति स्त्रीनपुंसकयोरिति वार्त्तिके न्योन्यमिमे ब्राह्मण्यौ इतरेतरमिमे कु

लेइत्यादितत्रोदाहृतं। स्त्रियामिति। प्रतिकर्मोपसहायाइति सर्वेस्य देइति सूत्रस्य भाष्यप्रयोगेऽपि बोध्यः। अन्यान्यप्राद्युभो
वादिति अपाशाने इति सूत्रस्य भाष्यप्रयोगे कर्मव्यतीहाराभावः स्पष्ट एव। अहंकुट्टूइति तत्र वर्तमानेपोस्तदर्थकयोरित्य
र्थः पुनस्तदेवेति। अनुवादकविभक्तेर्नापिप्रत्वादिति भावः। पक्षस्थाने क्लेश संभावनात्तत्रैव तदभावप्रतिपादनं सफलमिति साश
येनाहानि प्रियमितिय पश्चेतिस्वरान्तस्योभयार्थकत्वात् ज्ञातिधनवाचोतु स्यस्त्वे तेनमिधानात् देइति वीप्सायां पथ्याशब्दस्या
हृतेर्ह्रस्वाप्राप्त्यातदपि निपातस्ते निपात्यनेनिपातस्ते इति भावः क्लीबत्वं चेति तेन ह्रस्वसिद्धिः चेनेनकृतद्वित्वस्याप्यत्वाभा
संग्रहः ज्ञाते समस्तनेत त्वाखष्टीनत्वाचियथापथस्यज्ञाते सेव। यथास्वभावमिति यथास्वरूपमित्यर्थः ह्यान्तः सर्वे पदार्थाय
थायथ्य। स्वयथास्वभावं सर्वे पदार्थास्तान्ताइत्यर्थ इति वृत्तिसंमतं पूर्वपदस्यागभावं इति द्वौ द्वाविति द्विलेकर्मधारयवद्भावात्सु
पुत्रलुकि पूर्वपदावयवस्यकाभस्यामादेशइत्यर्थः अत्वेमिति संज्ञालाद् प्राप्तिः नपुंसकत्वं चेति चेन कृतद्वित्वान्नियत द्विवचनोऽस
सभावस्य संग्रहः कर्मधारयवद्भावादंतोदात्तत्वं। वाच्यमिति इदं वृत्तौ स्पष्टं अभिव्यक्तिरप्येवमित्यसेव। आचतुरमिति आङभि
विधौ आङ् मर्यादेत्यव्ययीभावः शरत्प्रभृतित्वाट्टच्। चतुर्थांतमिति फलितोर्थः मिथुनीयं तौ तानेनात्वपः मिथुनशब्देन तल्व राम॰
र्मि मे पुनं ते दिच्छंतीत्यर्थकः पचः मिथुनं गच्छतीति मिथुनस्तं प्राप्तो तौ सर्थः फलितार्थकथनमिदं मिथुनापंत इति कपंडःतापपाठः

ल·श·शे·
३९३

63

द्वर्वार्द्धं

उपमाथो भावान्नद्वंद्वपरघोस्यामयोरातुः एतावदेव पश्यतामा युधिष्ठिरमेवं हया। समाहि सेनच चतुरोभिख्याप्येस थेः प्र पौत्र पुत्रे
णापीति चतुरो चिभिख्या येस येद् इति हन्ति स्वरसः असंतसहचरितत्वेन लोकविज्ञानमात्राभिव्यक्तिः असंतसहचरितत्वलोकवि
ज्ञाते द्वंद्वमिसुपसंख्यानमिति वार्त्तिकात् तदाह स्माह चेर्थे रोत्ति तेनेह न द्वौ युधिष्ठिरार्जुनौ। द्वंद्वं मंत्री सतत्वी स्मायादित्व
मन्त्रस्यार्थे। अत्रापीति द्वंद्वं युद्धा म्नवर्त्तेनेति यथा अत्र द्वयोर्द्वयोरिस्य था द्वौ स्मायां द्विं भीनो स्मसु खड्गः खड्गस्नेषां द्वंद्वा
नि सह हेतेइ सत्र स्वार्थे द्वित्वमेकशेषाद्द्व द्वचनं पिथस्तार्थे द्वंद्व इति [illegible] स्य ते
द्वंद्वं [illegible] यथा चार्थे द्वंद्व इति स्वार्थे द्वित्वपुंस्त्वलोकात अयं योग विभागो भाष्ये न दृश्यते द्वंद्वं युद्धानी
त्यत्र मर्यादावचनेन सिद्धं। एषा हि युद्धमर्यादा शीतोष्णादिषु अभिव्यक्त्या सहचरितत्वं शब्दप्रयोगे बोध्यं। चार्थे द्वंद्व इति
तु संज्ञा शब्दास्तु सन्तः अभ्यवायो भानादिति तदाशयः विस्तरस्तु बृहच्छब्देन्दुशेखरे द्रष्टव्यः शब्देन्दुशेखरे खेलस्य पूर्वेम
र्धमप्युरं। प्रीयतीत्तेन भगवान् शिवया सहितः शिवः भूषितः फणिभाष्याख्याल्लघुः शब्देन्दुशेखरः सतां हृत्कमले
भान्तां यावत्फणिफणाधराः २ इति शिवभट्टसुत सतीगर्भज नागोजी भट्टकृते लघुशब्देन्दुशेखरे पूर्वार्धं सम ॥

ला·ग·
३९३